www.prepp.in

Prepp
Your Personal Exams Guide

Test Booklet Code & Serial No.
प्रश्नपत्रिका कोड व क्रमांक

**A**

# Paper-II
# SANSKRIT

**Signature and Name of Invigilator**

1. (Signature) ..........................................

(Name) ................................................

2. (Signature) ..........................................

(Name) ................................................

Seat No. [ ]
(In figures as in Admit Card)

Seat No. ................................................................
(In words)

OMR Sheet No. [ ]
(To be filled by the Candidate)

**JUN - 04225**

**Time Allowed : 2 Hours]** **[Maximum Marks : 200**

Number of Pages in this Booklet : **20** Number of Questions in this Booklet : **100**

**Instructions for the Candidates**

1. Write your Seat No. and OMR Sheet No. in the space provided on the top of this page.
2. This paper consists of **100** objective type questions. Each question will carry *two* marks. *All* questions of Paper II will be compulsory.
3. At the commencement of examination, the question booklet will be given to the student. In the first 5 minutes, you are requested to open the booklet and compulsorily examine it as follows :
   - (*i*) To have access to the Question Booklet, tear off the paper seal on the edge of this cover page. Do not accept a booklet without sticker-seal or open booklet.
   - (*ii*) Tally the number of pages and number of questions in the booklet with the information printed on the cover page. Faulty booklets due to missing pages/questions or questions repeated or not in serial order or any other discrepancy should not be accepted and correct booklet should be obtained from the invigilator within the period of 5 minutes. Afterwards, neither the Question Booklet will be replaced nor any extra time will be given. The same may please be noted.
   - (*iii*) After this verification is over, the OMR Sheet Number should be entered on this Test Booklet.
4. Each question has four alternative responses marked (A), (B), (C) and (D). You have to darken the circle as indicated below on the correct response against each item.

   **Example :** where (B) is the correct response.

   (A) ● (C) (D)

   Following wrong methods should not be used as they are not recognised by scanning machine in digitized assessment. Candidate using such method will be responsible for their loss.

   | WRONG METHODS |
   |---|
   | (A)(B✓)(C)(D) (A)(B✗)(C)(D) (A)(▬)(C)(D) (A)(**B**)(C)(D) |

5. Your responses to the items are to be indicated in the **OMR Sheet given inside the Booklet only.** If you mark at any place other than in the circle in the OMR Sheet, it will not be evaluated.
6. Read instructions given inside carefully.
7. Rough Work is to be done at the end of this booklet.
8. If you write your Name, Seat Number, Phone Number or put any mark on any part of the OMR Sheet, except for the space allotted for the relevant entries, which may disclose your identity, or use abusive language or employ any other unfair means, you will render yourself liable to disqualification.
9. You have to return original OMR Sheet to the invigilator at the end of the examination compulsorily and must not carry it with you outside the Examination Hall. You are, however, allowed to carry the Test Booklet and duplicate copy of OMR Sheet on conclusion of examination.
10. Use only Blue/Black Ball point pen.
11. Use of any calculator or log table, etc., is prohibited.
12. There is no negative marking for incorrect answers.

**विद्यार्थ्यांसाठी महत्त्वाच्या सूचना**

1. परीक्षार्थींनी आपला आसन क्रमांक या पृष्ठावरील वरच्या कोपऱ्यात लिहावा. तसेच आपणांस दिलेल्या उत्तरपत्रिकेचा क्रमांक त्याखाली लिहावा.
2. सदर प्रश्नपत्रिकेत 100 बहुपर्यायी प्रश्न आहेत. प्रत्येक प्रश्नास **दोन** गुण आहेत. या प्रश्नपत्रिकेतील **सर्व** प्रश्न सोडविणे अनिवार्य आहे.
3. परीक्षा सुरू झाल्यावर विद्यार्थ्याला प्रश्नपत्रिका दिली जाईल. सुरुवातीच्या 5 मिनिटांमध्ये आपण सदर प्रश्नपत्रिका उघडून खालील बाबी अवश्य तपासून पहाव्यात.
   - (*i*) प्रश्नपत्रिका उघडण्यासाठी प्रश्नपत्रिकेवर लावलेले सील उघडावे. सील नसलेली किंवा सील उघडलेली प्रश्नपत्रिका स्वीकारू नये.
   - (*ii*) पहिल्या पृष्ठावर नमूद केल्याप्रमाणे प्रश्नपत्रिकेची एकूण पृष्ठे तसेच प्रश्नपत्रिकेतील एकूण प्रश्नांची संख्या पडताळून पहावी. पृष्ठे कमी असलेली/कमी प्रश्न असलेली/प्रश्नांचा चुकीचा क्रम असलेली किंवा इतर त्रुटी असलेली सदोष प्रश्नपत्रिका सुरुवातीच्या 5 मिनिटातच पर्यवेक्षकाला परत देऊन दुसरी प्रश्नपत्रिका मागवून घ्यावी. त्यानंतर प्रश्नपत्रिका बदलून मिळणार नाही तसेच वेळही वाढवून मिळणार नाही याची कृपया विद्यार्थ्यांनी नोंद घ्यावी.
   - (*iii*) वरीलप्रमाणे सर्व पडताळून पाहिल्यानंतरच प्रश्नपत्रिकेवर ओ.एम.आर. उत्तरपत्रिकेचा नंबर लिहावा.
4. प्रत्येक प्रश्नासाठी (A), (B), (C) आणि (D) अशी चार विकल्प उत्तरे दिली आहेत. त्यातील योग्य उत्तराचा रकाना खाली दर्शविल्याप्रमाणे ठळकपणे काळा/निळा करावा.

   **उदा.** : जर (B) हे योग्य उत्तर असेल तर.

   (A) ● (C) (D)

   खालील चुकीच्या पद्धती वापरू नये, कारण डिजिटाइज्ड (Digitized) मूल्यांकनात स्कॅनिंग मशीन त्यांना ओळखत नाही. त्या पद्धती वापरून नुकसान झाल्यास त्यास विद्यार्थीच जबाबदार असतील.

   | WRONG METHODS |
   |---|
   | (A)(B✓)(C)(D) (A)(B✗)(C)(D) (A)(▬)(C)(D) (A)(**B**)(C)(D) |

5. या प्रश्नपत्रिकेतील प्रश्नांची उत्तरे **ओ.एम.आर. उत्तरपत्रिकेतच दर्शवावीत.** इतर ठिकाणी लिहिलेली उत्तरे तपासली जाणार नाहीत.
6. आत दिलेल्या सूचना काळजीपूर्वक वाचाव्यात.
7. प्रश्नपत्रिकेच्या शेवटी जोडलेल्या कोऱ्या पानावरच कच्चे काम करावे.
8. जर आपण ओ.एम.आर. वर नमूद केलेल्या ठिकाणाव्यतिरिक्त इतर कोठेही नाव, आसन क्रमांक, फोन नंबर किंवा ओळख पटेल अशी कोणतीही खूण केलेली आढळून आल्यास अथवा असभ्य भाषेचा वापर किंवा इतर गैरमार्गांचा अवलंब केल्यास विद्यार्थ्याला परीक्षेस अपात्र ठरविण्यात येईल.
9. परीक्षा संपल्यानंतर विद्यार्थ्याने मूळ ओ.एम.आर. उत्तरपत्रिका पर्यवेक्षकांकडे परत करणे आवश्यक आहे. तथापि, प्रश्नपत्रिका व ओ.एम.आर. उत्तरपत्रिकेची द्वितीय प्रत आपल्याबरोबर नेण्यास विद्यार्थ्यांना परवानगी आहे.
10. फक्त निळ्या किंवा काळ्या बॉल पेनचाच वापर करावा.
11. कॅलक्युलेटर किंवा लॉग टेबल वापरण्यास परवानगी नाही.
12. चुकीच्या उत्तरासाठी गुण कपात केली जाणार नाही.

www.prepp.in

www.prepp.in

Prepp
Your Personal Exams Guide



# Sanskrit
## Paper II
# संस्कृत
## प्रश्नपत्रिका II

**Time Allowed : 120 Minutes]** **[Maximum Marks : 200**

**Note :** This Paper contains **Hundred (100)** multiple choice questions. Each question carrying **Two (2)** marks. Attempt *All* questions.

**सूचना :** या प्रश्नपत्रिकेत एकूण **शंभर (100)** बहुपर्यायी प्रश्न दिलेले आहेत. प्रत्येक प्रश्नाला **दोन (2)** गुण आहेत. **सर्व** प्रश्न सोडवा.

1. कस्य वेदस्य आरण्यकं नास्ति ?
   (A) ऋग्वेदस्य
   (B) सामवेदस्य
   (C) यजुर्वेदस्य
   (D) अथर्ववेदस्य

2. वैदिक-पञ्चमहायज्ञेषु नान्तर्भवति ..........।
   (A) ब्रह्मयज्ञः
   (B) भूतयज्ञः
   (C) अतिथियज्ञः
   (D) पितृयज्ञः

3. 'जातवेदाः' इति कस्य देवस्य विशेषणमस्ति ?
   (A) अग्नेः
   (B) इन्द्रस्य
   (C) वरुणस्य
   (D) रुद्रस्य

4. अन्तरिक्षस्थानीया देवता अस्ति ...............।
   (A) अग्निः
   (B) इन्द्रः
   (C) उषाः
   (D) सूर्यः

5. अवेस्ताभाषा कस्मिन् भाषापरिवारे समाविष्टा ?
   (A) आर्यभाषावर्गे
   (B) ईराणीभाषावर्गे
   (C) केल्टिकभाषावर्गे
   (D) ग्रीकभाषावर्गे

6. शुक्लयजुर्वेदीय-शिवसंकल्पसूक्तस्य देवता अस्ति ............... ।

(A) शिव:

(B) महेश्वर:

(C) मन:

(D) रुद्र:

7. ऋग्वेदस्य कतमं मण्डलम् 'पवमानमण्डलम्' इत्यनेन परिचीयते ?

(A) सप्तममण्डलम्

(B) अष्टममण्डलम्

(C) नवममण्डलम्

(D) दशममण्डलम्

8. 'दुहितर्दिव:' इति कस्य देवस्य उपाधि: अस्ति ?

(A) उषस:

(B) सूर्यस्य

(C) इन्द्रस्य

(D) अग्ने:

9. 'को अद्धा वेद कइह प्रवोचत्' इति मन्त्रांश: प्राप्यते :

(A) हिरण्यगर्भसूक्ते

(B) नासदीयसूक्ते

(C) वाक्सूक्ते

(D) इन्द्रसूक्ते

10. 'हिरण्यावक्षा जगतो निवशनी'-इति मन्त्र: प्राप्यते ........................ ।

(A) भूमिसूक्ते

(B) कालसूक्ते

(C) हिरण्यगर्भसूक्ते

(D) वरुणसूक्ते

11. 'कस्मै देवाय हविषा विधेम' ? एतद् ध्रुवपदं कस्मिन् सूक्ते अस्ति ?

(A) हविस्सूक्ते

(B) अग्निसूक्ते

(C) हिरण्यगर्भसूक्ते

(D) नासदीयसूक्ते

www.prepp.in

Prepp
Your Personal Exams Guide



12. पुरोहितः नाम सायणदृष्ट्या ............... ।

(A) मन्त्रकर्त्ता

(B) मन्त्रद्रष्टा

(C) पूर्वभागे निहितः

(D) विचक्षणः

13. ज्ञानसूक्ते 'धीर' शब्दस्य सायणमतानुसारेण कः अर्थः ?

(A) बुद्धिमत्

(B) साहसिन्

(C) धैर्यशालिन्

(D) ईश्वर

14. 'अपां नेता' इति कः देवः स्तूयते ?

(A) विष्णुः

(B) पूषा

(C) सरस्वती

(D) इन्द्रः

15. कस्य व्रते ओषधीः विश्वरूपाः ?

(A) पर्जन्यस्य

(B) अश्विनोः

(C) धन्वन्तरेः

(D) रुद्रस्य

16. विश्ववारा नाम्ना का देवता प्रसिद्धा ?

(A) पृथिवी

(B) उषाः

(C) अदितिः

(D) एका

17. अधोलिखितेषु कः सामवेदस्य ब्राह्मणग्रन्थः ?

(A) ऐतरेय-ब्राह्मणम्

(B) शतपथ-ब्राह्मणम्

(C) गोपथ-ब्राह्मणम्

(D) पञ्चविंश-ब्राह्मणम्

18. गोपथब्राह्मणम् कस्य वेदस्य ब्राह्मणम् ?

(A) शुक्लयजुर्वेदस्य

(B) अथर्ववेदस्य

(C) कृष्णयजुर्वेदस्य

(D) ऋग्वेदस्य

19. तैत्तिरीयब्राह्मणे कति काण्डानि ?

(A) त्रीणि

(B) चत्वारि

(C) चतुर्दश

(D) पञ्च

20. अधोलिखितेषु केन ऐतरेय-ब्राह्मणस्य व्याख्यानं कृतम् ?

(A) सायणाचार्येण

(B) उवटाचार्येण

(C) षड्गुरुशिष्याचार्येण

(D) भट्टभास्कराचार्येण

21. 'एकस्मिन् धर्मिणि नानाधर्मावगाद ज्ञानम् भवति.................... ।

(A) शाब्दरूपम्

(B) समूहालम्बनात्मकम्

(C) स्पार्शनप्रत्यक्षरूपम्

(D) संशयात्मकम्

22. 'सर्ववृत्तिनिरोधे त्वसम्प्रज्ञात .................।'

(A) कैवल्य:

(B) समाधि:

(C) नियम:

(D) प्रत्याहार:

23. रिक्तस्थानं पूरयत—

'पृथिवी इतरेभ्यो भिदाते ...............।'

(A) कारणत्वात्

(B) साध्यवत्त्वात्

(C) गन्धवत्त्वात्

(D) कार्यत्वात्

24. रिक्तस्थानं पूरयत—

'सिषाधयिषाविरहविशिष्टः सिद्धाभावः ·······।'

(A) परामर्शः

(B) पक्षता

(C) कारणम्

(D) करणम्

25. तर्कभाषानुसारतः लौकिकसन्निकर्षः कतिविधः ?

(A) षड्विधिः

(B) दशविधः

(C) पञ्चविधः

(D) अष्टविधः

26. औलूक्यदर्शनमिति संज्ञा विधीयते—

(A) न्यायदर्शनस्य

(B) वेदान्तदर्शनस्य

(C) वैशेषिकदर्शनस्य

(D) योगदर्शनस्य

27. गौतममते प्रमेयपदार्थाः कति ?

(A) त्रयोदश

(B) द्वादश

(C) पञ्चदश

(D) षोडश

28. यदि 'गौः' लक्ष्यः तर्हि लक्ष्यतावच्छेदकं किम् ?

(A) शृङ्गित्वम्

(B) लाङ्गुलत्वम्

(C) गोत्वम्

(D) कपिलत्वम्

29. 'पर्वते वह्निरस्ति' इत्यनुमाने साध्यतावच्छेदकः सम्बन्धः कः ?

(A) समवायः

(B) संयोगः

(C) स्वरूपः

(D) तादात्म्यम्

Prepp
Your Personal Exams Guide



30. सृष्टिप्रक्रियायां प्रकृति-पुरुषयोः अवस्था उपमीयते ......................।

(A) शुक्तिरजतवत्

(B) जडाजडवत्

(C) मूकवधिरवत्

(D) पङ्ग्वन्धवत्

31. कस्य वेदस्य ऋत्विग् 'ब्रह्मा' भवति ?

(A) ऋग्वेदस्य

(B) सामवेदस्य

(C) यजुर्वेदस्य

(D) अथर्ववेदस्य

32. बभार इत्यत्र भवर्णस्य बवर्णे परिवर्तनं कस्य ध्वनिनियमानुगुणं भवति ?

(A) ग्रासमानस्य

(B) ग्रीमस्य

(C) वेर्नरस्य

(D) मॅक्सम्यूलरस्य

33. चिनीभाषा कस्मिन् भाषावर्गे समावेशमर्हति ?

(A) अयोगात्मकवर्गे

(B) विभक्तियुक्तवर्गे

(C) योगात्मकवर्गे

(D) संश्लेषात्मकवर्गे

34. 'त्रिमुनि व्याकरणम्' इत्यनेन वचनेन केषां निर्देशः भवति ?

(A) पाणिनिकात्यायनपतञ्जलीनाम्

(B) पाणिनिजैनेन्द्रशाकटायनानाम्

(C) कैय्यटनागेशवामनानाम्

(D) भर्तृहरिजयादित्यभट्टोजीनाम्

35. विसर्जनीयस्य स्थानं किम् ?

(A) तालु:

(B) कण्ठः

(C) मूर्धा

(D) नासिका

36. समूहबाह्यं निष्कासयत :

(A) महाभाष्यदीपिका

(B) उद्योत:

(C) परमलघुमञ्जूषा

(D) परिभाषेन्दुशेखर:

37. अधोनिर्दिष्टविधानानां सत्यासत्यत्वं चिनुत–

(*a*) यवला: ऊष्माण: सन्ति।

(*b*) वेदोत्तरभाषायां उदात्तादय: स्वरा: न विद्यन्ते।

(*c*) वाक्यपदीयस्य कर्त्ता शाकटायन: नास्ति।

(*d*) चिनीभाषा अयोगात्मकभाषावर्गे समावेशं नार्हति।

(A) सत्यम्, सत्यम्, सत्यम्, असत्यम्

(B) असत्यं, सत्यम्, असत्यम्, असत्यम्

(C) सत्यम्, सत्यम्, सत्यम्, सत्यम्

(D) असत्यं, सत्यम्, सत्यम्, असत्यम्

38. 'अनचि च' इति सूत्रेण कस्य द्वित्वं विकल्पेन विधीयते ?

(A) अच:

(B) यर:

(C) यण:

(D) इक:

39. नायक: इति पदे आयादेश: केन सूत्रेण विधीयते ?

(A) एचोऽयवायाव:

(B) सुप्तिङन्तं पदम्

(C) इको यणचि

(D) सुपि च

40. 'स्तो: श्चुना श्चु:' इति सूत्रस्य उदाहरणं किम् ?

(A) पेष्टा

(B) रामश्शेते

(C) सुध्युपास्य:

(D) तल्लीन:

www.prepp.in
Prepp
Your Personal Exams Guide



41. 'ढ्रलोपे पूर्वस्य दीर्घोऽण:' इत्यनेन किं विधीयते ?

(A) ह्रस्वादेश:

(B) दीर्घादेश:

(C) लोप:

(D) आगम:

42. 'द्वियमुनम्' इत्यत्र क: समास: ?

(A) केवल:

(B) अव्ययीभाव:

(C) बहुव्रीहि:

(D) द्वन्द्व:

43. 'उपकृष्णम्' इति समस्तपदे 'उप' इति अव्ययं कस्मिन्नर्थे प्रयुक्तम् ?

(A) समीपम्

(B) समृद्धि:

(C) पश्चात्

(D) सादृश्यम्

44. 'चोरभयम्' इत्यत्र केन सूत्रेण समास: विधीयते ?

(A) षष्ठी

(B) पञ्चमी भयेन

(C) कर्तृकरणे कृता बहुलम्

(D) द्विगुश्च

45. राजाह: सखिभ्य: क: प्रत्यय: विधीयते ?

(A) ञ:

(B) अच्

(C) क:

(D) टच्

46. 'ईशकृष्णौ' इत्यत्र क: समास: ?

(A) अव्ययीभाव:

(B) तत्पुरुष:

(C) बहुव्रीहि:

(D) द्वन्द्व:

www.prepp.in
Prepp
Your Personal Exams Guide



47. राजन् इति प्रातिपदिकस्य सम्बुद्ध्येकवचने किं रूपम् ?

(A) राजा

(B) राजानः

(C) राज्ञः

(D) राजन्

48. 'शब्दानामनुशासनम्' इत्यत्र षष्ठी कस्मिन्नर्थेऽस्ति ?

(A) सम्बन्धे

(B) कर्तरि

(C) कर्मणि

(D) भावे

49. अतत्त्वतोऽन्यथाप्रथा .............. इत्युदीरितः।

(A) परिणामः

(B) विकारः

(C) विवर्तः

(D) रेक्यम्

50. 'अथातो ब्रह्मजिज्ञासा' इत्यत्र जिज्ञासा इत्यत्र सन्वाच्यायाः इच्छायाः कर्म किम् ?

(A) बोधः

(B) जिज्ञासा

(C) अवगतिपर्यन्तं ज्ञानम्

(D) भ्रमज्ञानम्

51. षोडशकः गणः कस्मात् जायते ?

(A) प्रकृतेः

(B) पुरुषात्

(C) भूतेभ्यः

(D) अहंकारात्

52. प्रतिविषयाध्यवसायो दृष्टम् ........... भवति।

(A) अनुमानम्

(B) उपमानम्

(C) प्रत्यक्षम्

(D) आगमः

www.prepp.in

Prepp
Your Personal Exams Guide



53. अनर्थहेतोः प्रहाणाय वेदान्ताः आरभ्यन्ते इत्यत्र अनर्थ हेतुः कः ?

(A) विद्या

(B) कर्म

(C) कर्मफलम्

(D) अविद्या

54. तात्पर्य निर्णायकलिङ्गानि कति भवन्ति ?

(A) षट्

(B) त्रीणि

(C) दश

(D) चत्वारि

55. योगशास्त्रे कति प्रमाणानि भवन्ति ?

(A) चत्वारि

(B) त्रीणि

(C) पञ्च

(D) सप्त

56. प्रयोगसमवेतार्थस्मारकाः ................ भवन्ति।

(A) मन्त्राः

(B) शब्दाः

(C) उपनिषदः

(D) अर्थवादाः

57. आर्य बुद्धस्य अभिमतेषु चतुर्षु तत्त्वेषु इदं नान्तर्भवति .................।

(A) दुःखम्

(B) समुदायः

(C) निरोधः

(D) सत्कारणम्

58. ...................... अर्थशास्त्रानुसारं विद्या न अस्ति।

(A) आन्वीक्षिकी

(B) त्रयी

(C) वार्ता

(D) नीतिः

59. सर्वेण तु प्रयत्नेन ................ समाश्रयेत्।

(A) महीदुर्गम्

(B) धन्वदुर्गम्

(C) गिरिदुर्गम्

(D) अब्दुर्गम्

60. धर्मशास्त्रेषु कतिविधाः पुत्राः स्मृताः ?

(A) नवविधाः

(B) दशविधाः

(C) द्वादशविधाः

(D) चतुर्दशविधाः

61. याज्ञवल्क्यस्मृत्यनुसारं रिक्तस्थानं पूरयत 'स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः। अर्थशास्त्रात्तु बलवद् .......................... इति स्थितिः॥'

(A) धर्मशास्त्रम्

(B) नीतिशास्त्रम्

(C) नृपादेशः

(D) नृपस्येच्छा

62. अर्थशास्त्रानुसारं परमर्मज्ञः प्रगल्भः छात्रः कः ?

(A) उदास्थितः

(B) कापटिकः

(C) गृहपतिकव्यञ्जन

(D) तापसः

63. यद् द्रव्यम् अन्यस्य हस्ते रक्षणार्थं स्थाप्यते तद् ...................... ।

(A) औपनिधिकम्

(B) औपश्लेषिकम्

(C) औपदेशिकम्

(D) अभिव्यापकम्

64. यदा प्रहृष्टा मन्येत सर्वांस्तु प्रकृतीर्भृशम्।
अत्युच्छ्रितं तथात्मानं तदा कुर्वीत ........॥

(A) संधिः

(B) विग्रहम्

(C) यानम्

(D) संश्रितिः

65. आपदर्थे धनं रक्षेत दारान् रक्षेत् धनैरपि।

आत्मानं सततं रक्षेत् दारैरपि धनैरपि॥

इति कस्य उक्तिः ?

(A) कौटिल्यस्य

(B) मनोः

(C) याज्ञवल्क्यस्य

(D) शुक्राचार्यस्य

66. महाराष्ट्रप्रान्तस्य ठाणे-जनपदस्य स्थानविशेषः, यत्र भग्नः अशोक-शिलालेखः प्राप्तः —

(A) सोपारा

(B) बोरीवली

(C) दतिया

(D) येर्रागुडी

67. मिहिरभोजस्य ग्वालियर-अभिलेखस्य विषयोऽस्ति —

(A) सामाजिक समरसता

(B) प्रतिहारवंशप्रशस्तिः

(C) धर्मोपदेशः

(D) अश्वमेधयज्ञः

68. नैषधीयचरितमहाकाव्ये कति सर्गाः सन्ति ?

(A) 22

(B) 21

(C) 19

(D) 20

69. 'पद्मावती स्वामिनो देवी भविष्यतीति'' कैरादिष्टम् ?

(A) मुनिभिः

(B) पुष्पकभद्रादिभिः

(C) यौगन्धरायणादिभिः

(D) महासेनादिभिः

70. ''सर्वः सगन्धेषु विश्वसिति। उभावपि खलु आरण्यकौ'' इत्यस्मिन् शाकुन्तलनाटके वाक्ये उभौ कौ ?

(A) शकुन्तला-दुष्यन्तः

(B) शकुन्तला-मृगपोतः

(C) शकुन्तला-वृक्षलता

(D) शकुन्तला-प्रियंवदा

71. हर्षचरितं कति उच्छ्वासेषु विभक्तम् ?

(A) चतुर्षु

(B) सप्तसु

(C) अष्टसु

(D) दशसु

72. किरातार्जुनीयमहाकाव्ये प्रधानः रसः कः ?

(A) शृङ्गारः

(B) करुणः

(C) वीरः

(D) शान्तः

73. मुद्राराक्षसे चन्द्रगुप्तस्य अन्तःपुरचरः कञ्चुकी भवति ...................... ।

(A) सिद्धार्थकः

(B) चन्दनदासः

(C) वैहीनरिः

(D) भागुरायणः

74. शिशुपालवधमहाकाव्यस्य प्रथमसर्गस्य नाम किम् ?

(A) श्रीकृष्णगुणकीर्तनम्

(B) नारदगुणकीर्तनम्

(C) कृष्णनारदसम्भाषणम्

(D) नारदबलरामसम्भाषणम्

75. बुद्धचरिते सिद्धार्थस्य हृदि संयोगोत्पत्तौ प्रथमकारणं किं वर्णितम् ?

(A) रुग्णस्य दर्शनम्

(B) बुद्धस्य दर्शनम्

(C) मृतस्य दर्शनम्

(D) उद्यानस्य दर्शनम्

76. मृच्छकटिके विदूषकस्य नाम भवति .......... ।

(A) अर्चकः

(B) मैत्रेयः

(C) शर्विलकः

(D) संस्थानकः

77. अधस्तनयुग्मानां समीचीनां तालिकां चिनुत—

| | |
|---|---|
| (*a*) हर्षचरितम् | (1) शूद्रकः |
| (*b*) मुद्राराक्षसम् | (2) दण्डी |
| (*c*) दशकुमारचरितम् | (3) विशाखदत्तः |
| (*d*) मृच्छकटिकम् | (4) बाणभट्टः |

| | (*a*) | (*b*) | (*c*) | (*d*) |
|---|---|---|---|---|
| (A) | (4) | (3) | (2) | (1) |
| (B) | (3) | (2) | (4) | (1) |
| (C) | (4) | (3) | (1) | (2) |
| (D) | (3) | (2) | (1) | (4) |

78. ''सरस्वती स्वादु तदर्थवस्तु, निःषन्द्यमाना महतां कवीनाम्''—इत्यत्र 'निःषन्द्यमाना' इत्यस्य कोऽर्थः ?

(A) प्रवहन्ती

(B) निःसरणं कुर्वती

(C) निःसारणं कुर्वती

(D) चलन्ती

79. ''गङ्गायां घोषः'' इत्यत्र शीतत्वपावनत्वादेरातिशम्यरूपार्थः कया वृत्त्या बोध्यते ?

(A) अभिधया

(B) लक्षणया

(C) व्यञ्जनया

(D) तात्पर्यवृत्त्या

80. 'रीतिरात्मा काव्यस्य' मतमिदं कस्य विद्यते ?

(A) वामनस्य

(B) रुद्रटस्य

(C) मम्मटस्य

(D) भामहस्य

81. 'शिवराज्योदयम्' इत्यस्य काव्यस्य कर्ता कः ?

(A) श्री. भा. वर्णेकरः

(B) अम्बिकादत्तव्यासः

(C) ग. बा. पळसुलेमहोदयः

(D) व्ही. राघवन्महोदयः

82. कुन्तकोक्ताः काव्यमार्गाः कति ?

(A) पञ्च

(B) षट्

(C) सप्त

(D) त्रयः

83. नाट्यवस्तुनि वृत्तवर्त्तिण्यमाणानां कथांशानां निदर्शकः कः ?

(A) विष्कम्भकः

(B) प्रवेशकः

(C) नान्दीपाठः

(D) भरतवाक्यम्

84. "अश्राव्यं खलु यद् वस्तु तदिह ................ मतम्" इति वाक्यं पूरयत।

(A) प्रकाशम्

(B) जनान्तिकम्

(C) स्वगतम्

(D) आकाशभाषितम्

85. "विभावानुभावव्यभिचारि संयोगाद्रसनिष्पत्तिः" इति रससूत्रे अभिनवगुप्तमते निष्पत्तिरिति पदस्य कोऽर्थः ?

(A) भुक्तिः

(B) अनुमितिः

(C) अभिव्यक्तिः

(D) उत्पत्तिः

86. ध्वनेस्तत्त्वं गिरामगोचरं वाचामविषये स्थितमिति केषामभिप्रायः ?

(A) अभाववादिनाम्

(B) भाक्तवादिनाम्

(C) अनिर्वचनीयवादिनाम्

(D) अलङ्कारवादिनाम्

87. साहित्यदर्पणानुसारं रसास्वादने को हेतुः ?

(A) काव्यपाठः

(B) सत्त्वोद्रेकः

(C) पात्राणि

(D) सहृदयता

www.prepp.in



88. महाभारते शिशुपालवधवृत्तान्तः कस्मिन् पर्वणि वर्तते ?
(A) सभापर्वणि
(B) भीष्मपर्वणि
(C) वनपर्वणि
(D) विराटपर्वणि

89. मनुस्मृति-ग्रन्थे कति अध्यायाः सन्ति ?
(A) द्वादश
(B) दश
(C) पञ्चदश
(D) विंशतिः

90. मिताक्षरा-टीका केन लिखिता ?
(A) अपरार्केण
(B) विश्वरूपेण
(C) ब्रह्मणा
(D) विज्ञानेश्वरेण

91. कस्मिन् शिलालेखे 'देवानांप्रिय' इत्युपाधिना सह तस्य नाम अशोक इति प्राप्यते :
(A) मस्की-शिलालेखे
(B) ऐहोल-शिलालेखे
(C) कन्धार-शिलालेखे
(D) एरण -शिलालेखे

92. केन कारितः ऐहोल-शिलालेखः ?
(A) रविकीर्तिना
(B) मिहिरभोजेन
(C) ईशानवर्मणा
(D) अशोकेन

93. आदिपुराणम् इति नाम्ना किं पुराणं प्रसिद्धम् ?
(A) ब्रह्मपुराणम्
(B) विष्णुपुराणम्
(C) मत्स्यपुराणम्
(D) कूर्मपुराणम्

94. केषां ज्ञानम् आगमपूर्वकमिति भर्तृहरिः निर्दिशति ?
(A) सर्वेषाम्
(B) ऋषीणाम्
(C) वैयाकरणानाम्
(D) वेदान्तिनाम्

95. रामायणस्य प्रधानरसः कः स्वीक्रियते ?
(A) शृङ्गाररसः
(B) करुणरसः
(C) वीररसः
(D) रौद्ररसः

www.prepp.in

Prepp
Your Personal Exams Guide



96. पम्पासरोवरस्य तटे श्रीरामस्य विलापः कस्मिन् काण्डे वर्णितः ?

(A) अरण्यकाण्डे

(B) किष्किन्धाकाण्डे

(C) सुन्दरकाण्डे

(D) युद्धकाण्डे

97. बौद्धेषु एते नान्तर्भवन्ति।

(A) माध्यमिकाः

(B) आर्हताः

(C) योगाचाराः

(D) सौत्रान्तिकाः

98. क्रियायोगे इदं नान्तर्भवति ?

(A) तपः

(B) नियमः

(C) ईश्वरप्रणिधानम्

(D) स्वाध्यायः

99. ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती ............... यथा। अत्र रिक्तस्थानं पूरयत।

(A) शब्दस्य

(B) शब्दार्थयोः

(C) सर्वस्य

(D) तेजसो

100. मेलनं कुरुत—

| | |
|---|---|
| (*a*) ऋकारः | (*i*) तालव्यः |
| (*b*) तकारः | (*ii*) दन्त्यः |
| (*c*) पकारः | (*iii*) मूर्धन्यः |
| (*d*) इकारः | (*iv*) ओष्ठ्यः |

| | (*a*) | (*b*) | (*c*) | (*d*) |
|---|---|---|---|---|
| (A) | (*iii*) | (*ii*) | (*i*) | (*iv*) |
| (B) | (*iii*) | (*ii*) | (*iv*) | (*i*) |
| (C) | (*iii*) | (*iv*) | (*ii*) | (*i*) |
| (D) | (*iii*) | (*i*) | (*ii*) | (*iv*) |

www.prepp.in



## ROUGH WORK